National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 312-316
© 2026 NJHSR
www.sanskritarticle.com

**धीरजकुमारचौधरी**
संस्कृत-शोधार्थी,
कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, कामेश्वरनगरम्, दरभङ्गा, बिहारराज्यम्
सहायक-अध्यापकः, संस्कृतम्
इण्टरमीडिएट कालेज भरौली, बलिया, उत्तरप्रदेश

**Correspondence:**
**धीरजकुमारचौधरी**
संस्कृत-शोधार्थी,
कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, कामेश्वरनगरम्, दरभङ्गा, बिहारराज्यम्

# "लकारार्थविवेचनपुरस्सरं किरातार्जुनीयमहाकाव्ये प्रयुक्तकेषाञ्चन तिङन्तपदानां शब्दशास्त्रीयं समीक्षणम्"

**धीरजकुमारचौधरी**

**"मुखं व्याकरणं स्मृतम्"** इत्युक्त्या वेदाङ्गेषु वेदपुरुषस्य मुखाङ्गभूतस्य व्याकरणशास्त्रस्य सर्वतोभावेन सर्वत्र प्राधान्यं दरीदृश्यते।तस्मिन् व्याकरणशास्त्रे पातञ्जलमहाभाष्ये उक्तेन **"चत्वारि श्रृङ्गा त्रयोऽस्य पादा:०"** इति वचनानुसारेणाऽस्य व्याकरणशास्त्रस्य पादाङ्गभूतस्य कालस्याऽस्मिन् व्याकरणशास्त्रे विशिष्टं स्थानं वर्तते।ते च काल: प्रथमतया द्विधा विभज्यते अद्यतनाऽनद्यतन- भेदात्। तत्र प्रथमस्त्रिविध: भूतभविष्यवर्तमानभेदै:।तथा च द्वितीय: द्विविध: भूतभविष्यभेदात्। तद्यथोक्तं वर्तते हारीतसंहितायां प्रथमस्थाने चतुर्थाध्याये-

**"कालस्तु त्रिविधो ज्ञेयोऽतीतोऽनागत एव च।**
**वर्तमानस्तृतीयस्तु वक्ष्यामि शृणु लक्षणम्।।**

तदेतया कारिकया ज्ञायते यत् भूतभविष्यवर्तमानभेदै: कालस्य त्रयो भेदा: वर्तन्ते।तत्र भूतभ विष्ययो: केचिदवान्तरभेदा अपि वर्तन्ते।अथ वृत्तयोऽप्याज्ञा प्रवर्तना तथाऽऽशीर्वादभेदै: त्रिधा: सन्ति।अत्र महर्षिपाणिनिना कालस्तथा वृत्त्यवबोधकं तत्वं लकारेणोक्तं वर्तते।ते च लकारा: संस्कृतव्याकरणे दशसङ्ख्यात्मका: सन्ति।तद्यथा- लट्लिट्लुट्लृट्लेट्लोट्लङ्लिङ्लुङ्लृङिति। एषु पञ्चमो लेट्लकार: छन्दसि प्रयुज्यते।एते लडादिलकारा: सकर्मकेभ्य: धातुभ्य: कर्मणि कर्तरि तथाऽकर्मकेभ्यो धातुभ्यो भावे कर्तरि च विधीयते।तद्यथा सूत्रम्-**"ल: कर्मणि च भावे चाऽकर्मकेभ्य:"** (अष्टाध्यायी-३.४.६९)

एते लकारा: कस्मिन् काले कस्यां वृत्तौ च भवतीति जिज्ञासायां वैयाकरणभूषणसारस्य लकारार्थप्रकरणे निरूपितनिम्नकारिकाभ्यां सामान्यतया ज्ञातुं शक्यते।तद्यथा-

**"वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति।**
**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादय:।।**
**ह्यो भूते प्रेरणादौ च भूतमात्रे लङादय:।**
**सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृत:।।**

(वैयाकरणभूषणसारकारिकासं०-२२-२३)

टिल्लकारा: कस्मिन्नर्थे प्रयुज्यन्त इति समान्यतया प्रथमकारिकया तथा ङिल्लकारा: कस्मिन्नर्थे प्रयुज्यन्त इति द्वितीयकारिकया च ज्ञातुं शक्यते।तद्बोधकं सूत्रं तथा प्रत्येकं लक्षणं केषाञ्चनोदाहरणञ्चाध: प्रस्तूयते। तत्र सर्वप्रथमतया वर्तमानकाले लट्लकार: प्रयुज्यते। तद्विधायकं सूत्रं **"वर्तमाने लट्"-(अष्टाध्यायी-३.२.१२३)** इति वर्तते।अत्र **वर्त्तमानत्वं नाम "प्रारब्धाऽपरिसमाप्तक्रियोपलक्षितत्वं वर्तमानत्वम्"** इति।

अथ च **"भूतभविष्यद्भिन्नत्वं वर्तमानत्वम्"** एतयो: द्वयो: लक्षणयोरयमाशयो वर्तते यद् या क्रिया सम्प्रत्यारब्धा वर्तते न परिसमाप्तेति तत्र लट्लकारो विधीयते।**उदाहरणम्-"इच्छन्ति"** इति तिङन्तपदं किरातार्जुनीयस्य प्रथमसर्गस्य द्वितीयपद्ये प्रयुक्तं वर्तते।प्रयोगेऽस्मिन् **"इषु इच्छायाम्"(सिद्धान्तकौमुदी-**

**१३५१)** इति तुदादिगणीय: परस्मैपदी सकर्मक: सेट् धातु: वर्तते।तस्मात् **"भूवादयो धातव:" (अष्टाध्यायी-१.३.१)** इत्यनेन धातुसञ्ज्ञायां **"वर्तमाने लट्"-(३.२.१२३)** इत्यनेन लट्यनुबन्धलोपे च **"शेषात् कर्तरि परस्मैपदम्"-(**१.३.७८) इत्यनेन परस्मैपदे **"तिप्तस्झिसिप्थस्थ०"-(**३.४.७८) इत्यनेन सूत्रेण तिबादिकार्ये प्रथमपुरुषबहुवचने 'झी'ति प्रत्यये **"तिङ्शित्सार्वधातुकम्"-(३.४.११३)** इत्यनेन सार्वधतुकसञ्ज्ञायां **कर्तरि शप्**

**(३.१.६८)** इत्यनेन शबिति प्राप्ते सति तुदादिगणपठितत्वात् **"तुदादिभ्यःशः"-(**३.१.७७) इत्यनेन शबिति बाधित्वा 'श' इति प्रत्यये **"लशक्वतद्धिते"-(१.३.८)** इत्यनेन शेत्यस्येत्सञ्ज्ञायां लोपे सति "अ" इति शेषे "इष् अ झि"इति स्थिते **"इषुगमियमां छ:"-(७.३.७७)** इत्यनेन छादेशे सति "इछ् अ झि" इति स्थिते **"झोन्त:"-(७.१.३)** इत्यनेन सूत्रेण 'झि' इत्यस्य स्थाने "अन्ती"त्यादेशे सति "इछ् अ अन्ति" इति स्थिते **"छे च"-(७.१.७३)** इत्यनेन तुगागमे सति तथा **"स्तो:श्चुना श्चु:"-(८.४.४)** इत्यनेन सूत्रेण तकारस्य श्चुत्वे चकारे तथा वर्णसम्मेलने च इच्छन्ती'ति रूपम्।यस्यार्थोऽभिलषन्तीति। रूपमिदं कर्तृवाच्यस्य वर्तते। पदस्यैतस्य कर्तृपदं भवति हितैषिण इति।अर्थात् स्वामिहितार्थिन: सेवाकर्मणि संलग्ना: पुरुषा: मृषा मिथ्याभूतं श्रुत्यानन्दकरं प्रियं वचनं प्रवक्तुं नेच्छन्ति स्वप्नेऽप्यन्यथा कार्यविघातकतया स्वामिद्रोहिण: स्युरिति यतोहि तेनाऽसत्येन वचसा नृपति: यथार्थज्ञानरहितेन स्वकर्त्तव्यात् पतितो भूत्वा पराधीनो भवितुमर्हति,अर्थात् स्वराज्यात् निर्मुक्तो भविष्यतीति।अत एव नीतिवाक्यामृते उक्तं वर्तते**-**

**"अमौढ्यममान्द्यममृषाभाषित्वमभ्यूहकत्वञ्चेति चारगुणा:"** इति। अनेन सिध्यति स्वामिहितार्थिभिः भृत्यैः सर्वदा स्वामिने सत्यं निवेदनीयं येन नृपति: यथार्थं जानीयात्।

तत्र द्वितीयक्रमे विद्यमानस्य लिट्लकारस्य प्रयोगो वर्तते,स च परोक्षे भूतेऽनद्यतनेऽर्थे भवति। सूत्रम्-**"परोक्षे लिट्"-**३.२.११५ इति ।अत्र परोक्षशब्द: **"अक्ष्ण: परं परोक्षम्"** इति व्युत्पत्तौ मयूरव्यंसकादि-समासेन सिध्यति। **"परोक्षत्वञ्च साक्षात्करोमि इत्येतादृशविषयाशालि ज्ञानाविषयत्वम्"**।तथाऽनद्यतनञ्च **"न अद्यतनम् अनद्यतमम्"**। अत्र तावदर्थो सिध्यति यदनद्यतने भूतार्थे लिट्लकार: प्रयुज्यत इति। **उदाहरणम्-विव्यथे-**इति पदस्य प्रयोगः किरातार्जुनीयस्य प्रथमसर्गस्य द्वितीयपद्ये वर्तते।प्रयोगेऽस्मिन् **"व्यथ भयसञ्चलनयोः" (सिद्धान्तकौमुदी-७६४)** इति भ्वादिगणीय आत्मनेपद्यकर्मकः सेट् धातुः वर्तते।एतस्माद्धातोः **"भूवादयो धातवः"-**१.३.१ इत्यनेन धातुसञ्ज्ञायां **"परोक्षे लिट्"-**३.२.११५ इत्यनेन लिट्यनुबन्धलोपे सति **"अनुदात्तङित आत्मनेपदम्"-**१.३.१२ इत्यनेन आत्मनेपदे **"तिप्तस्झिसिप्थस्थमिब्वस्मस्ताऽऽताञ्झथासाथान्ध्व मिड्व-हिमहिङ्" -**३.४.७८ इत्यनेन सूत्रेण प्रथमपुरुषैकवचने आत्मनेपदे "त" इति प्रत्यये **"लिटस्तझयोरेशिरेच्"-**३.४.८१ इत्यनेन तकारस्य स्थाने एशित्यादेशे **"हलन्त्यम्"-**१.३.३ इत्यनेन सूत्रेण शकारस्य इत्सञ्ज्ञायां लोपे तथा च **"लिटि धातोरनभ्यासस्य"-**६.१.८ इत्यनेन धातोः द्वित्वे "व्यथ् व्यथ् ए "इति स्थितौ **"पूर्वोऽभ्यासः"-** ६.१.४ इत्यनेनाऽभ्याससञ्ज्ञायां **"व्यथो लिटि"-**७.४.६८ इत्यनेन सूत्रेण व्यथोऽभ्यासस्य सम्प्रसारणे पूर्वरूपे च "विथ् व्यथ् ए" इति स्थिते **"हलादि शेष:"-**६०.४.६० इत्यनेन हलादिलोपे वर्णसम्मेलनेन च विव्यथे इति रूपम्।एतस्यार्थ: व्यथितमिति।

पदस्यैतस्य कर्तृपदं मन: इति।एतस्य पदस्य भाव: कथमेवं शत्रुप्रशंसारूपं वचनं प्रभवे निवेदयामीत्याख्यं मनागपि मनो न विचलितं न वा भयान्वितं तस्य वनेचरस्य जातमिति।अर्थात् कथमीदृशमप्रियं कटुवचनं स्वस्वामिने राज्ञे कथं विज्ञापयामीति मनसि नाल्पमपि विचारयामास। तत्र तृतीयक्रमे स्थितस्य लुट्लकारस्य प्रयोग: "श्वो भाविनि" अनद्यतनेऽर्थे भवति **"अनद्यतने लुट्"-**३.३.१५ इति तद्विधायकं सूत्रं विद्यते। प्रसङ्गेऽस्मिन् लक्षणाशक्त्या श्व इति पदमनद्यतनपरात्मकं वर्तते। तस्मादनद्यतनेऽर्थे भविष्यत्काले लुट्लकारो विधीयते इत्यर्थो लभ्यते। अत्र **"भविष्यत्वं नाम वर्तमानप्रागभावप्रतियोगित्वम्"** तथा चानद्यतनमित्युक्ते यद् अद्यतनं नेति।तस्मादेतत् फलति यत् "अतीताया: रात्रे: पश्चार्द्धेन,आगमिन्या रात्रे: पूर्वार्द्धेन च सहितो दिवस एव फलति। यथा-शब्दशक्तिप्रकाशिकायां लोट्लक्षणं वर्तते-**"धात्वर्थे श्वस्तनत्वस्य बोधिका तिङ् लुडुच्यते"** इति।अत्रोदाहरणम्-लब्धा-इति पदस्य प्रयोग: किरातार्जुनीयस्य द्वितीयसर्गस्य सप्तदशतमे पद्ये वर्तते। प्रयोगेऽस्मिन् **"डुलभष् प्राप्तौ" (सिद्धान्तकौमुदी-९७५)** इति भ्वादिगणीय आत्मनेपदी सकर्मकोऽनिट् धातु: वर्तते। तस्माद्धातुसञ्ज्ञायामनुबन्धलोपे च "लभ्" इति शेषे इत्यस्मात् कर्मणि **"अनद्यतने लुट्"-**३.३.१५ इत्यनेन लुट्यनुबन्धलोपे च **"भावकर्मणो:"-** १.३.१३ इत्यनेनात्मनेपदे तिबादि कार्ये प्रथमपुरुषैकवचने 'त'प्रत्यये **"स्यतासी लृलुटो:"-**३.१.३३ इत्यनेन "तास्" इति प्रत्यये **"लुट: प्रथमस्य डारौरस:"-**२.४.८५ इत्यनेन "त" स्थाने "डा"इत्यादेशेऽनुबन्धलोपे तथा च डित्वासामर्थ्यात् आस् भागस्य लोपे **"झषस्तथोर्धोऽध:"-**८.२.४० इत्यनेन तकारस्य धकारे सति **"झलां जश् झशि"-**८.४.५३ इत्यनेन जश्त्वे च लब्धा इति रूपम्।लप्स्यत इत्यर्थः।रूपमिदं कर्मवाच्यस्य वर्तते।अत्र कर्तृपदं त्वया युधिष्ठिरेण तथा कर्मपदं पदं स्थानम्,स्वराज्यमिति।अर्थात् त्वया पदं लब्धेति। प्रसङ्गस्य तात्पर्यमिदं वर्तते यत् कपटेनाधिकृतं राज्यं रिपुणा दुर्योधनेन वनवासकालव्यतीते सत्यपि सरलरीत्या न प्रत्यर्पयिष्यति यदि कदाचित् प्रत्यर्पयेदपि युद्धं विना त्वया स्वराज्यं लब्धाऽपि भवतामनुजानां त्रैलोक्यविख्यातपौरुषस्य दीनताप्रकाशन-मेव भविष्यतीति।

तत्र चतुर्थेक्रमे विद्यमानो लृट्लकार: क्रियार्थायां क्रियायामथ च शेषे इत्यनेन तद्भिन्नक्रियायामपि भविष्यार्थे प्रयुज्यते।तात्पर्योऽयं यद् अत्रैकां क्रियां निवर्तयितुं द्वितीया क्रियाऽपि प्रवर्तते,तत्र या क्रिया प्रधानाऽस्ति तस्या: निर्देशाय लृट्लकारो विधीयते।यथा-श्याम:

पठनक्रियार्थं विद्यालयं गच्छति,तर्हि अत्र प्रसङ्गेऽस्मिन् पठनक्रिया प्रधानाऽस्ति तथा च गमनक्रिया क्रियार्था क्रिया वर्तते।अस्यां परिस्थितौ मुख्यक्रियाया निर्देशो लृट्लकारेण क्रियते इति।यथा- श्याम: पठिष्यति विद्यालयं गच्छति।अत्र लृड्विषये शब्दशक्तिप्रकाशिकाकारस्तु कथयति। तद्यथा

**"क्रियातिपाते कालस्य भाविन: प्राक्तनस्य च।**

**वैशिष्ट्यबोधिका या तिङ् लृट् च लृङ् च क्रमादिमे।।"**

उदाहरणम्-**नेष्यति** इति पदस्य प्रयोग: किरातार्जुनीयस्य तृतीयसर्गस्य नवविंशतितमे पद्ये वर्तते।प्रयोगेऽस्मिन् **"णीञ् प्रापणे" (सिद्धान्तकौमुदी-९०१)** इति भ्वादिगणीय उभयपदी द्विकर्मकोऽनिट् धातुर्वर्तते। तस्माद्धातुसञ्ज्ञायामनुबन्धलोपे च **"णो न:"- ६.१.६५** इत्यनेन धातो: णकारस्य नत्वे सति "नी" इत्यस्मात् **"लृट् शेषे च"- ३.३.१३** इत्यनेन लृट्यनुबन्धलोपे **"शेषात् कर्तरि परस्मैदम्"- १.३.७८** इत्यनेन परस्मैपदे तिबादिकार्ये प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे ति इति शेषे

**"स्यतासीलृलुटो:" -३.१.३३** इत्यनेन "स्य" इति प्रत्यये **"आर्धधातुकं शेष:"-३.४.११४** इत्यनेनार्धधातुकसञ्ज्ञायाम् **"आदेश: प्रत्यययो:"- ८.३.५९**

इत्यनेन षत्वे सार्वधातुकगुणे च नेष्यतीति रूपम्। प्रापयिष्यतीति।रूपमिदं कर्तृवाच्यस्य विद्यते।पदस्यैतस्य कर्तृपदं गुह्यक:(यक्ष:) इति।पदस्यैतस्य तात्पर्यमिदं यत् तस्मिन् शिलोच्चयेऽर्थादिन्द्रकीलपर्वते एष: गुह्यक: त्वामर्जुनं सत्वरमेव प्रापयिष्यतीति। तत्र पञ्चमे क्रमे विद्यमानस्य लेट्लकारस्य वेदे प्रयोगादस्मिन् महाकाव्ये प्रयोगाऽभावाच्च तस्य लेट्लकारस्य वर्णनं स्थलेऽस्मिन् न क्रियते इति।

तत्र षष्ठे क्रमे विद्यमानस्य लोट्लकारस्य प्रयोग आशिषि तथा विध्यादिष्वर्थेषु भवति।तद्बोधकं सूत्रद्वयम्-**"आशिषि लिङ्लोटौ" ३.३.१७३** तथा **"लोट् च"-३.३.१६२** इति वर्तते।अत्राशीस्तु सुखादिशुभविषयका शंसनरुपेच्छेति अर्थादप्राप्तस्य प्राप्तीच्छेति।अत्र विध्यादिशब्देन विधि:, निमन्त्रणम्,आमन्त्रणम्,अधीष्टम्,सम्प्रश्न: तथा प्रार्थनेति गृह्यते।अत्र लोट्लकारस्य लक्षणं शब्दशक्तिप्रकाशिका-कारमतानुसारेण

**"स्ववक्त्रमनुमतत्वस्य धात्वर्थेऽन्वयबोधने।**

**अनुकूला यादृशी तिङ् सैव लोट् परिभाष्यते।।**

**उदाहरणम्-विधीयताम्** इति पदस्य प्रयोग: प्रथमसर्गस्य पञ्चविंशति-तमे पद्ये वर्तते।प्रयोगेऽस्मिन् "वि" उपसर्गपूर्वक: **"धीङ् आधारे आदाने अनादरे च" (सिद्धान्तकौमुदी-११३६)** इति दिवादिगणीय आत्मनेपदी सकर्मकोऽनिट् धातु: वर्तते।तस्माद्धातुसञ्ज्ञाया-मनुबन्धलोपे **"उपसर्गा: क्रियायोगे"-१.४.५९** इत्यनेन "वि" इत्यस्योपसर्गसञ्ज्ञायां **"ते प्राग्धातो:"-१.४.८०** इत्यनेन पूर्वप्रयोगे सति "वि धी" इति स्थिते **"लोट् च"-३.३.१६२** इत्यनेन लोट्य-नुबन्धलोपे **"अनुदात्तङित आत्मनेपदम्"-१.३.१२** इत्यनेनात्मने-पदे तिबादि कार्ये प्रथमपुरुषैकवचने आत्मनेपदे "त" इति प्रत्यये सार्वधातुकसञ्ज्ञायां **"कर्तरि शप्"-३.१.६८**

इत्यनेन शप्प्राप्ते शपं बाधित्वा **"दिवादिभ्य: श्यन्" ३.१.५९** इत्यनेन श्यन्यनुबन्धलोपे सति "य" इति शेषे "वि धी य त" इति स्थिते

**"टित आत्मनेपदानां टेरे"-३.४.७९** इत्यनेनैत्वे **"आमेत:"- ३.४.९०** इत्यनेन लोट्सम्बन्ध्येकारस्यामित्यादेशे सति विधीयता-मिति रूपम्।यस्यार्थ: क्रियतामिति।रूपमिदं कर्तृवाच्यस्य विद्यते। पदस्यैतस्य कर्तृपदं भवान् युधिष्ठिर इति।अर्थात् भवता सह कपटं कर्तुं प्रवृत्तस्य तस्य दुर्योधनस्य प्रतीकारो भवान् शीघ्रं विधीयतां, क्रियतामित्यर्थः।

तत्र सप्तमे क्रमे विद्यमानस्य लङ्लकारस्य प्रयोगोऽनद्यतने भूतार्थे भवति।तद्विधायकं सूत्रञ्च वर्तते **"अनद्यतने लङ्"-३.२.१११** इति। अत्रानद्यतनमित्यनेन नाद्यतनं यत् तदनद्यतनमित्यभिप्रेतं वर्तते।अर्थात् प्रसङ्गेऽस्मिन् "अनद्यतन" इति शब्दे बहुव्रीहिसमासेन **"अविद्यमानोऽद्यतनो यस्मिन्निति सोऽनद्यतनः भूत"** इत्यर्थोऽपि लभ्यते। तस्मादत्रानद्यतनमिति भूतकालस्य विशेषणरूपेण विराजते।तथा च भूत इति शब्द: धात्वर्थक्रियाविशेषरूप इति।तस्मादुक्तं वर्तते शब्दशक्तिकारिकायाम्-

**"ह्यो भूते प्रेरणादौ च भूतमात्रे लङादय:"** इति।अत्र ह्य इति शब्दादव्यवहितातीतदिवसरूपेण गृहीतं वर्तते।तथा चात्र

**भूतत्वञ्च वर्तमानध्वंसप्रतियोगिक्रियाश्रयकालत्वम्** इति। तर्कालङ्का-रेऽपि लङ्लकारस्य लक्षणमुक्तं वर्तते।तद्यथा-

**"या स्मयोगे विना धातो शबाद्यन्तस्यार्थधार्मिके।**

**अतीतत्वग्रहे हेतुस्तादृशी तिङ् लङुच्यते।।**

तस्मादनद्यतनभूतकालवृत्तिर्या क्रिया तद्वाचकाद्धातोर्लङ्लकारो भवतीत्यर्थो लभ्यते। उदाहरणञ्च- ***अयुङ्क्त-** इति पदस्य प्रयोग: प्रथमसर्गस्य प्रथमे पद्ये वर्तते। प्रयोगेऽस्मिन् **"युजिर् योगे" (सिद्धान्तकौमुदी -१४४४)** इति रुधादिगणीयोभयपदी सकर्मकोऽनिट् धातुर्वर्तते। तस्माद् **"इर इत्संज्ञा वक्तव्या"** इति वार्तिकेन "इर" इत्यस्येत्सञ्ज्ञायां युजिति शिष्यते।तस्माद् **"भूवादयो धातव:"-१.३.१** इत्यनेन धातुसञ्ज्ञायां **"ल: कर्मणि च भावे चाऽकर्मकेभ्य:"- ३.४.६९** इत्यनेन सकर्मकादस्माद्धातो: कर्तरि वाच्ये

**"अनद्यतने लङ्"-३.२.१११** इत्यनेन लङि **"ल:परस्मैपदम्"-१.४.९९** इत्यनेन परस्मैपदे प्राप्ते **"तङानावात्मने पदम्"-१.४.१००**

इत्यनेनापवादे सत्यात्मनेपदे **"तिप्तस्झिसिप्थस्थमिब्व स्मस्ताऽऽ-ताञ्झथासाथान्ध्वमिड्वहिमहिङ्"-३.४.७८** इत्यनेन प्रथमपुरुषैकवचने 'त' इतिप्रत्यये **"तिङ्शित्सार्वधातुकम्"-३.४.११३** इत्यनेन सार्वधातुकसञ्ज्ञायां **"कर्तरि शप्"-३.१.६८** इत्यनेन शबिति विकरणे प्राप्ते सति रुधादिगणपठित्वाद् **रुधादिभ्यः श्नम्-३.१.७८** इत्यनेनापवादे शपं बाधित्वा श्नम्यनुबन्धलोपे च 'न' इति शिष्यते तथा **"मिदचोऽन्त्यात्पर:"-१.१.४७** इति नियमबलादन्तिमाच: परे विधीयमानेन "यु+न+ज्+त "इति स्थिते **"लुङ्लङ्लृङ्क्ष्वडुदात:"- ६.४.७१**

इत्यनेनाडागमे सति तथा **"श्नसोरल्लोपः"-६.४.१११** इत्यनेन नकारस्थाकारस्य लोपे सति "अयु न् ज् त"इति स्थिते **"चो कुः"-८.२.३०** इत्यनेन चवर्गस्य कुत्वे **"खरि च"-८.४.५५** इत्यनेन चर्त्वे सति "अ यु न् क् त " इति स्थिते **"नश्चापदान्तस्य झलि"-८.३.२४** इत्यनेनानुस्वारे **"अनुस्वारस्य ययि परसवर्णः"-८.४.५८** इत्यनेन परसवर्णे चायुङ्क्तेति रुपमिदं कर्तृवाच्यस्य वर्तते।पदस्यैतस्य कर्तृपदं भवति युधिष्ठिर इति।एतस्य तिङन्तस्यार्थो नियोजनमर्थात् नियुक्तवानिति।अर्थाद् युधिष्ठिरो यं वनेचरं ब्रह्मचारिणं नियुक्तवानित्यर्थः।

तत्राष्टमेक्रमे स्थितस्य लिङ्लकारस्य प्रयोगो प्रेरणादिष्वर्थेषु भवति।तस्मादुच्यते वैयाकरणभूषणसारे-

**"ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।"** तत्र लिङ्विधायकं सूत्रं भवति **"विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्न प्रार्थनेषु लिङ्"-३.३.१६१** इति।

अत्र **१.विधिः-"विधिर्नाम प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम्"** इति।अत्र प्रवर्तनम् इत्यनेन प्रेरणं प्रवृत्यनुकूलो व्यापारो गृह्यते।सामान्यतया सेवकं प्रति यादृशाचरणं क्रियते तादृशाचरणं ज्ञापयितुं लिङ्लकारो विधीयते।यथा-स्वामी गोपालं प्रति वदति त्वं गां रक्षेः।

**२.निमन्त्रणम्-"निमन्त्रणञ्च-नियोगकरणमावश्यकेषु श्राद्धभोजनादिषु दौहित्रादेः प्रवर्तनम्"** इति।यत्र कस्याप्युपस्थितिरपरिहार्या, अवश्यम्भाविन्येव।तत्र निमन्त्रणमभिप्रेतं भवति।यथा-कश्चित् श्राद्धे दौहित्रं प्रति भवानवश्यमेव भुञ्ज्यादिति ब्रूते।

**३.आमन्त्रणम्-"आमन्त्रणं कामचारानुज्ञा।कामचारो नामेच्छाप्रचार-स्तेन यत्करणं तदामन्त्रणम्"**।यथेच्छं क्रियतामित्यनुज्ञेति।अस्मिन् पक्षे स्वीकारोऽस्वीकारोऽपि कर्तुं शक्यते तेन।तस्मात् यथेच्छमित्युक्तं वर्तते।

यथा-यथेच्छमिह भवान् भुञ्जीत।

**४.अधीष्टम्– "अधीष्टं सत्कारपूर्वको व्यापार"** इति।धनमादि समर्प्य यो व्यापारो भवति सोऽभिप्रेतः।यथा-ममानुजमध्यापयेत् भवान्।

उपरोक्तं चतुष्टयमपि प्रवर्तनारूपेण ज्ञायते।भर्तृहरिणाऽप्युक्तं तद्यथा- **"अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।**
**तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया।।**

**५.सम्प्रश्नः-"सम्प्रश्नः कर्त्तव्याकर्त्तव्यविषयकप्रश्नः"** इति।

यथा-किं सः संस्कृतं पठेत्।

**६.प्रार्थना-प्रार्थना याचना"** इति।यथा-राजा मे गां दद्यात्।

**अपहारयेत्** इति पदस्य प्रयोगः प्रथमसर्गस्यैकत्रिंशत्तमे पद्ये वर्तते।प्रयोगेऽस्मिन् **"अप" उपसर्गपूर्वकः"हृञ् हरणे" (सिद्धान्त-कौमुदी८९९)** इति भ्वादिगणीय उभयपदी द्विकर्मकोऽनिट् धातुः वर्तते।तस्माद्धातुसञ्ज्ञायामनुबन्धलोपे च **"हेतुमति च"-३.१.२६** इत्यनेन णिच्यनुबन्धलोपे सति 'इ' शेषे **"अचो ञ्णिति"-७.२.११५** इत्यनेन वृद्धौ च "अपहारि" इत्यस्मात् **"सनाद्यन्ता धातवः"-३.१.३२** इत्यनेन
धातुसञ्ज्ञायां **"विधिनिमन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्"-३.३.१६१** इत्यनेन विधिलिङ्घ्नुबन्धलोपे **"शेषात् कर्तरि परस्मैदम्"-१.३.७८** इत्यनेन परस्मैपदे तिबादिकार्ये प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे सार्वधातुकसञ्ज्ञायां शप्यनुबन्धलोपे च **"यासुट् परस्मैपदेषूदात्तो ङिच्च"-३.४.१०३** इत्यनेन यासुडागमे **"लिङः सलोपोऽनन्त्यस्य"-७.२.७९** इत्यनेन सलोपे प्राप्ते **"अतो येयः"-७.२.८०** इत्यनेन "यास्" इत्यस्य स्थाने "इय्" आदेशे **"इतश्च"-३.४.१००** इत्यनेन तिबित्यस्येकारस्य लोपे च "अपहारि अ इय् त्" इति स्थिते **"लोपो व्योर्वलि"-६.१.६६** इत्यनेन यकारस्य लोपे **"सार्वधातुकार्धधातुकयोः" -७.३.८४** इत्यनेन गुणे **"एचोऽयवायावः"-६.१.७८** इत्यनेनायादेशे "अपहार् अय् अ इ त्" इति स्थिते **"आद्गुणः"-६.१.८७** इत्यनेन गुणे चापहारयेदिति रूपम्। त्यजेदर्थात्स्वयमेवापहारं कारयेदित्यर्थः। रूपमिदं कर्तृवाच्यस्य विद्यते।पदस्यैतस्य कर्तृपदं नराधिप इति।अस्मिन् संसारे न कश्चिदपि त्वत्तोऽधिको विवेकरहितो प्रतिभाति यस्त्वं विवेकवानपि कुलजां स्वस्त्रियमिव वंशक्रमादागतां राज्यलक्ष्मीं त्यक्तवानसि भवान् एकैवेदृश इत्यर्थः।

प्रसङ्गेऽस्मिनाशीरर्थे आशिर्लिङ्लकारो विधीयते **"आशिषि लिङ्लोटौ" -३.३.१७३** इत्यनेन सूत्रेण।अत्राशीरित्युक्तेः **"अप्राप्तस्य प्राप्तिरिच्छेति"**।यत्किञ्चिदपीप्सितं विद्यते परञ्च प्राप्तं नास्ति,तस्य प्राप्तये इच्छां प्रकटयितुमाशीर्लिङ्लकारस्य प्रयोगः क्रियते।

यथा- परमेश्वरः मे दीर्घायुष्यं दद्यात्।

**क्रियात्-**इति पदस्य प्रयोगः तृतीयसर्गस्य द्विपञ्चाशत्तमे पद्ये वर्तते।प्रयोगेऽस्मिन् **"डुकृञ् करणे" (सिद्धान्तकौमुदी-१४७२)** इति तनादिगणीय उभयपदी सकर्मकोऽनिट् धातुर्वर्तते। तस्माद्धातु-सञ्ज्ञायामनुबन्धलोपे च "कृ" इति शेषे **"आशिषि लिङ्लोटौ"-३.३.१७३** इत्यनेनाशिर्लिङ्घ्नुबन्धलोपे तिबादिकार्ये प्रथमपुरुषैक-वचने तिप्यनुबन्धलोपे ति इति शेषे **"यासुट् परस्मैपदेषूदात्तो ङिच्च"-३.४.१०३**
इत्यनेन यासुडागमेऽनुबन्धलोपे **"लिङाशिषि"-३.४.११६**
इत्यनेनार्धधातुकसञ्ज्ञायां **"किदाशिषि"-३.४.१०४** इत्यनेन
किद्वद्भावे सति "कृ यास् ति" इति स्थिते **"इतश्च"-३.४.१००** इत्यनेन तिबित्यस्येकारस्य लोपे **"स्कोः संयोगाद्योरन्ते च"-८.२.२९** इत्यनेन सकारलोपे **"रिङ् शयग्लिङ्क्षु"-७.४.२८** इत्यनेन रिङादेशे च क्रियादिति रूपम्।करोत्वित्यर्थः।रूपमिदं कर्तृवाच्यस्य विद्यते।कर्तृपदं मघवेति।

पदस्यैतस्य तात्पर्यमिदं यद्विजयाय प्रस्थितस्य तवाऽर्जुनस्य तेषामघानां विघातमिन्द्रः करोत्विति।

म तत्र नवमे क्रमे विद्यमानस्य लुङ्लकारस्य प्रयोगो भूतमात्रे भवति।यथा वैयाकरणभूषणसारस्य निम्नकारिकांशेन ज्ञातुं शक्यते-

**"ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः"** इति।

अनेन दृष्टान्तेन सिद्ध्यति यत् सामान्यभूतार्थे लुङ्लकारो धातोः परे विधीयते।अत्र सामान्येत्यनेन शब्देन **"परोक्षे लिट्"-३.२.११५** तथा **"अनद्यतने लङ्"-३.२.१११** इत्यनयोः परोक्षाऽनद्यतनविशेषार्थं व्यतिरिच्य सामान्यभूताऽर्थे सर्वत्र **"लुङ्"-३.२.११०** इत्यनेन सूत्रेण लुङ्लकारो विधीयते।अनेन ज्ञायते यत् भूतसामान्ये एव लुङ्लकारो विशेषे परोक्षेऽनद्यतनार्थे च लङ्लिटोर्दर्शनादिति।अत्र **"भूतत्वञ्च " वर्तमानध्वंसप्रतियोगित्वम्"** इति।

**अवोचत** इति पदस्य प्रयोगो द्वितीयसर्गस्य द्वितीयपद्ये वर्तते।प्रयोगेऽस्मिन् **"ब्रूञ् व्यक्तायां वाचि" (सिद्धान्तकौमुदी-१०४४)** इत्यदादिगणीय उभयपदी द्विकर्मक: सेट् धातु: वर्तते। तस्माद्धातुसञ्ज्ञायामनुबन्धलोपे च "ब्रू" इति शेषे ततो **"लुङ्"-३.२.११०**

इत्यनेन सूत्रेण लुङ्घ्नुबन्धलोपे च **"स्वरितञित: कर्त्रभिप्राये क्रिया-फले"-१.३.७२** इत्यनेनेनात्मनेपदे तिबादि कार्ये प्रथमपुरुषैकवचने 'त' प्रत्यये ततः **"लुङ्लङ्लृङ्क्ष्वड्उदात्त:"६.४.७१** इत्यनेनाडागमे सति "अ ब्रू त" इति स्थिते **"च्लि लुङि"-३.१.४३** इत्यनेन "च्लि"इति प्रत्यये **"आर्धधातुकं शेष:"-३.४.११४** इत्यनेन आर्धधातुकसञ्ज्ञायां **"ब्रुवो वचि:"-२.४.५३** इत्यनेन "ब्रू" इति स्थाने "वच्" इत्यादेशे **"अस्यतिवक्तिख्यातिभ्योऽङ्"-३.१.५२** इत्यनेन "अङ्" इत्यादेशे सति "अ वच् अ त" इति स्थिते **"वच उम्"-७.४.१२०** इत्युमागमे सति "अ व उ च् अ त" इति स्थिते **"आद्गुण:"-६.१.८७** इत्यनेन गुणे चावोचत इति रूपम्।स्त्रीलिङ्गे उक्तवत्यित्यर्थ:। रूपमिदं कर्तृवाच्यस्य विद्यते।पदस्यैतस्य कर्तृपदं मानिनी द्रौपदीति।अर्थात् मानिनी निजकुलाभिमानवती द्रौपदी यद् अवोचत इति।

तत्र दशमे क्रमे विद्यमानस्य लृङ्लकारस्य प्रयोगः क्रियातिपत्तौ गम्यमाने सति हेतुमद्भावे भूते भविनि च सम्भूयते।

तद्यथोल्लिखितं वर्तते वैयाकरणभूषणसारे निम्नकारिकायाम्-

**"ह्यो भूते प्रेरणादौ च भूतमात्रे लङादय:।**
**सत्यां क्रियातिपत्तौ च भूते भविनि लृङ्स्मृत:।।**

अत्र क्रियातिपत्तिरित्युक्ते: क्रियाया: अनिष्पत्तावर्थात् क्रियाया: अभावे सति हेतुहेतुमद्भावे लिङ्निमित्ते भूते भविष्ये च लृङ्लकारो विधीयते इति। अत्र कारण-फलयुग्ममेव लृङ्निमित्तं कथ्यते। प्रसङ्गेऽस्मिन् लृङ्विधायकं सूत्रं भवति **"लिङ्निमित्ते लृङ् क्रियातिपत्तौ"-३.३.१३९** इति।

सूत्रस्यार्थस्यावबोधाय सूत्रमिदं भागद्वये विभक्तुं शक्यते।तत्र प्रथमो भाग: लिङ्निमित्तं द्वितीयश्च क्रियातिपत्तिरिति।अत्र लिङ्निमित्त-मित्यनेन कारणफलयुग्मयो: बोधो जायते।यथा-कृष्णं नमेत् चेत् सुखं यायात्।अस्मिन्नुदाहरणे कृष्णस्य नमस्काररूपात्मकेन कारणेन सुखरूपात्मकं फलं प्राप्स्यते।एतदेव लिङ्निमित्तमिति।अत्रेदानीं नमस्कारो न कृत इति सूचितो भवति तथा च द्वितीयभागे क्रियातिपत्तिरित्यनेन क्रियाया: अभावो बुध्यते।तस्मात् सूत्रार्थो लभ्यते यद् यत्र हेतुफलयुग्मेन निर्दिष्टक्रियाया अभावो भविष्यकालेनावबुध्यते तत्र लृङ्लकारो विधीयते इति।यथा-सुवृष्टिश्चेद् अभविष्यत् तदा सुभिक्षमप्यभविष्यत्।अर्थात् यदा सुष्ठु: वृष्टि: भविष्यति तदा सुभिक्षमपि भविष्यति।

**प्रतिपत्स्यत**-इति पदस्य प्रयोग: किरातार्जुनीयस्य त्रयोदशे सर्गे नवचत्वारिंशत्तमे पद्ये वर्तते। प्रयोगेऽस्मिन् "प्रति" इत्युपसर्ग-पूर्वक: "पद गतौ" (सिद्धान्तकौमुदी-११६९) इति दिवादिगणीय आत्मनेपदी सकर्मकोऽनिट् धातु: वर्तते। तस्माद्धातुसञ्ज्ञाया-मनुबन्धलोपे च "पद्" इति शेषे **"उपसर्गा: क्रियायोगे"-१.४.५९** इत्यनेन "पद्" इत्यस्य "प्रति" इत्यनेन योगे सत्युपसर्गसञ्ज्ञायां **"ते प्राग्धातो:" १.४.८०** इत्यनेन पूर्वप्रयोगे सति "प्रति पद्" इति स्थिते **"लिङ्निमित्ते लृङ् क्रियातिपत्तौ"-३.३.१३९** इति लृङ्घ्नुबन्धलोपे **"अनुदात्तङित आत्मनेपदम्"-१.३.१२** इत्यने-नात्मनेपदे तिबादिकार्ये प्रथमपुरुषैकवचने आत्मनेपदे "त" इति प्रत्यये **"स्यतासी लृलुटो:"-३.१.३३**

इत्यनेन "स्य" इति प्रत्यये आर्धधातुकसञ्ज्ञायां **"लुङ्लङ्लृङ्क्ष्वडु-दात्त:"-६.४.७१** इत्यनेनाडागमे सति "प्रति अ पद् स्य त" इति स्थिते **"इको यणचि"-६.१.७७** इत्यनेन यणि तथा **"खरि च"-८.४.५५** इत्यनेन चर्त्वे च प्रत्यपत्स्यत इति रूपम्।रूपमिदं कर्तृवाच्यस्य विद्यते। पदस्यैतस्य कर्तृपदं वाहिनीपति: किरातपति: शिव इति।पदस्यैतस्य भावोऽयं नञित्यनेन योगे सति नाभियुञ्जतीत्यर्थ:।

**अकरिष्यत्**-इति पदस्य प्रयोग: किरातार्जुनीयस्य त्रयोदशतमे सर्गे नवचत्वारिंशत्तमे पद्ये वर्तते।प्रयोगेऽस्मिन् **"डुकृञ् करणे" (सिद्धान्तकौमुदी-१४७२)** इति तनादिगणीय उभयपदी सकर्मकोऽनिट् भिदादिर्धातुर्वर्तते। तस्माद्धातुसञ्ज्ञायामनुबन्धलोपे च "कृ" इति शेषे **"लिङ्निमित्ते लृङ् क्रियातिपत्तौ"-३.३.१३९** इत्यनेन लृङ्घ्नु-बन्धलोपे च **"शेषात् कर्तरि परस्मैदम्"-१.३.७८** इत्यनेन परस्मैपदे तिबादिकार्ये प्रथमपुरुषैकवचने "तिप्" इति प्रत्ययेऽनुबन्धलोपे सति "कृ ति" इति स्थिते **"स्यतासीलृलुटो:"-३.१.३३** इत्यनेन "स्य" इति प्रत्यये आर्धधातुकसञ्ज्ञायां **"लुङ्लङ्लृङ्क्ष्वडुदात्त"-६.४.७१** इत्यनेनाडागमे सति "अ कृ स्य ति" इति स्थिते **"ऋद्धनो:स्ये"-७.२.७०** इत्यनेन स्य परे इडागमेऽनुबन्धलोपे सति "अ कृ इ स्य ति" इतिस्थिते **"इतश्च"-३.४.१००** इत्यनेनेकारस्य लोपे **"सार्वधातुकार्ध धातुकयो:"-७.३.८४**

इत्यनेन सार्वधातुकगुणे सति " अ कर् इ स्य त्" इति स्थिते **"आदेश:प्रत्ययो:"-८.३.५९** इत्यनेन षत्वे चाकरिष्यदिति रूपम्।

स्थलेऽस्मिन् पद्ये उभयो: तिङन्तपदयो: प्रयोग: लिङ्निमित्तं वर्तेते। तस्मात् पदस्यैतस्य तात्पर्यं भवति यत् वाहिनीपति: किरातपति: शिव: शितेन पत्त्रिणा शरेण यद्येनं मृगं न प्रत्यपत्स्यत तर्ह्यसौ मृग: स्वौजसा त्वय्यर्जुनविषये यदनिष्टमकरिष्यत्,तद्दुर्वाच्यं वर्ततेऽर्थाद-मङ्गलतया वक्तुमपि न शक्यते।तस्मादेतदनिष्टं मा स्म भूदित्यर्थ:।अत: उभयत्र लृङ्लकारस्य प्रयोग: कृतो महाकविना भारविना पद्येऽस्मिन्निति भावः।

**"दुर्वचं तदथ मास्म भून्मृगस्त्वय्यसौ तदकरिष्यदोजसा।**
**नैनमाशु यदि वाहिनीपति: प्रत्यपत्स्यतशितेन पत्त्रिणा।।**

(किरातार्जुनीयम्-१३.४९) इति शम्।

**सन्दर्भग्रन्थाः-**

१.वैयाकरणमहाभाष्यम्,२.वैयाकरणभूषणसारः,
३.शब्दशक्तिप्रकाशिका,४.व्याकरणतत्त्वविमर्श:
५.सिद्धान्तकौमुदी,६.किरातार्जुनीयमहाकाव्यम्,
७.अष्टाध्यायी

*(उपरोक्तेषु सूत्रेषु अष्टाध्याय्यनुसारं सूत्रसङ्ख्या प्रदत्ता वर्तते।